ष्यतेरनुकूलव्यापारवानित्याकारस्तत्र बोधः छ्यात्तूत्तरशिचा व्यापारबोधनादिति कालापाः। पाणिनीयास्तु "धारेरुत्तमर्णः" इति सूत्रानुसारेण चैत्राय शतं धारयते इत्यादाविव गुरवे गां धारयते इत्यादावपि ऋणग्रहणं धारणं तत्त्वञ्च चतुर्थ्यर्थः तथाच गुरुदत्तां गां ऋणत्वेन स्वीकरोतीत्याकारस्तत्र वाक्यार्थः पश्चाच्छोध्यत्वेनाङ्गीकृत्य गृहीतञ्च द्रव्यमृणमित्याहुः। पुत्राय राध्यति पुत्रायेक्षते इत्यादौ दैवनिरूपणं धात्वर्थस्तद्विषये च दैवे तुर्थस्य सम्बन्धस्यान्वयस्तेन पुत्रस्य दैवं निरूपयतीत्येव तत्र बोधः। गुरवे गां प्रतिशृणोति आशृणोतीत्यादौ देयत्वेनाभ्युपगमः शृणोतेरर्थस्तत्र गोर्विशेष्यत्वेन तदेकदेशे च दाने गुरोरुद्देश्यत्वेनान्वयस्तेन गुरूद्देश्यकदानकर्मत्वेन गामभ्युपगच्छतीत्येवं तत्र बोधः। होत्रे प्रतिगृणातीत्यादौ हर्षानुकूलव्यापारलक्षणं प्रोत्साहनं गृणातेरर्थस्तदेकदेशे च हर्षे होत्रादेरन्वयस्तेन होतृनिष्ठहर्षानुकूलव्यापारवानित्याकारकस्तत्र बोधः। चैत्राय कुप्यति क्रुध्यतीत्यादौ धात्वर्थे उत्कटद्वेषस्तत्र विषयित्वलक्षणं सम्प्रदानत्वं चतुर्थ्या बोध्यते तेन च चैत्रविषयकोत्कटद्वेषवानित्याकारकस्तत्र बोधः। पुत्रे कोपो न युज्यते इत्यादौ कृदन्तस्य कोपपदस्यैवार्थे पुत्र इत्यस्यान्वयो न तु धात्वर्थे; पटाय यतते इत्यादावपि धात्वर्थकृतौ सुपा पटस्य विषयित्वं बोध्यते तत्रोद्देश्यत्वमेव चतुर्थ्यर्थः कथमन्यथा पटेच्छया तन्तुनिर्माणदशायां पटाय यतते इत्यादिकः प्रयोगः इत्यपि वदन्ति। मित्राय द्रुह्यतीत्यत्र हिंसाचरणं द्रोहस्तेन मित्रस्य हिंसाचरतीत्यर्थः। शिष्यायेर्ष्यतीत्यत्रानिष्टानुप्रेक्षणमीर्ष्या तथाच शिष्यानिष्टं नोपेक्षत इत्यर्थः। पुत्रायासूयतीत्यत्र चासूयया गुणद्वेषस्तेन पुत्रस्य गुणं द्वेष्टीत्याकारस्तत्र बोधः। मित्रं द्रुह्यति शिष्यमीर्ष्यतीति पुत्रमसूयतीत्यपि प्रयोगात् द्रुहादिकर्मणः सम्प्रदानत्वं वैकल्पिकमित्युन्नीयते। कोपपूर्वकस्य द्रोहादेर्द्रुहादिधातुवाच्यत्वे तत्कर्मणः सम्प्रदानत्वं द्रोहादिमात्रस्य तद्वाच्यत्वे तु कर्मत्वमेवेति पुनः कौमाराः। सोपसर्गयोस्तु क्रुधद्रुहोः कर्मणः कर्मत्वेन न तु सम्प्रदानता अतएव शिष्यस्याभिक्रोद्धा मित्रस्याभिद्रोढेत्यादौ कृद्योगे कर्मणि षष्ठ्येव प्रमाणम्"।

**सम्प्रदाय** पु० सम्+प्र+दा—भावे घञ्। १गुरुपरम्परागते सदुपदेशे अमरः। उपचारात् २तदुपदेशयुते जने च। ईश्वरस्यैव सर्वसम्प्रदायप्रद्योतकत्वमिति "निर्माणकायमधिष्ठाय सर्वसम्प्रदायप्रद्योतक इति पातञ्जलाः" कुसुमा०। ईश्वरवादे च मणिकृताऽऽशङ्क्य तथैव व्यवस्थापितं यथा "नन्वशरीरात् कथं वेदघटादिशब्दव्यवहारसम्प्रदायः उच्यते सर्गादावदृष्टोपगृहीतभूतभेदाधीनशरीरोत्पत्तावदृष्टवदात्मसंयोगादृष्टवदुत्कृतप्रयत्नवदीश्वरसंयोगाद्वा सकलवेदार्थगोचरज्ञानादिविवक्षासहिताधीनकलेवरकण्ठताल्वादिक्रियाजन्यसंयोगाद्वेदोत्पत्तिः। एवं कुलालादिशरीरावच्छेदेनादृष्टवदुत्कृतप्रयत्नवदीश्वरसंयोगात्तद्बुद्धीच्छासहितचेष्टोत्पत्तौ सकलघटानुकूलव्यापारो घटोत्पत्तिः। एवं प्रयोज्यप्रयोजकज्ञानाय व्यापाराभिमतशरीरावच्छेदेनापि अदृष्टवदुत्कृतेश्वरज्ञानेच्छाप्रयत्नादेव व्यवहारः, ततस्तद्दर्शी बालो व्युत्पद्यते सोऽयं भूतावेशन्यायः। यत्तु यथा लिप्यादिना मौनिश्लोकोऽनुमाय पठ्यते तथा सर्गान्तरोत्पन्नतत्त्वज्ञानवता भोगार्थं सर्गादावुत्पन्नेन मन्वादिना सर्वज्ञेन, ईश्वराभिप्रायस्थवेदः साक्षात्कृत्यानूद्यते ततोऽपि न सम्प्रदायः स एव कायव्यूहं कृत्वा वागव्यवहारं करोतीति मतं तन्न प्रतिसर्गाद्यनन्तसर्वज्ञकल्पनायां गौरवात् तेषामेव क्षित्यादिकर्तृत्वसम्भवेन ईश्वरानुगमाच्च। एतेन सर्गादौ सर्गान्तरसिद्धयोगिन एव क्षितिकर्त्तारः सन्त्विति निरस्तं सर्गादावनन्तसर्वज्ञसिद्धिश्च किं प्रमाणान्तरात् क्षित्यादिकर्तृग्राहकाद्वा नाद्यस्तदभावात् नान्त्यः अनादिद्व्यणुकादिकार्य्यप्रवाहस्य सकर्तृकत्वानुमानात् लाघवसहकृतादेकस्यैव सर्वज्ञस्य सिद्धेः"।

सम्प्रदायप्रवर्त्तकभेदाश्च पद्मपु० उक्ता यथा "श्रीमन्नारायणो ब्रह्मा नारदो व्यास एव च। श्रीलमध्वः पद्मनाभो नृहरिर्माधवस्तथा। अक्षोभो जयतीर्थश्च ज्ञानसिन्धुर्महानिधिः। विद्यानिधिश्च राजेन्द्रो जयधर्ममुनिस्तथा। पुरुषोत्तमो ब्रह्मण्यो व्यासतीर्थमुनिस्तथा। श्रीमल्लक्ष्मीपतिः श्रीमान् माधवेन्द्रपुरी तथा। सम्प्रदायविहीना ये मन्त्रास्ते निष्फला मताः। अतः कलौ भविष्यन्ति चत्वारः सम्प्रदायिनः। श्रीमाध्वरुद्रसनका वैष्णवाः क्षितिपावनाः" पद्मपु०। तन्त्रोक्ता वैष्णवसम्प्रदाया यथा "श्रीशिव उवाच वैखानसः सामवेदी श्रीराधावल्लभी तथा। गोकुलेशो महेशानि! तथा वृन्दावनी भवेत्। पञ्चरात्रः पञ्चमः स्यात् षष्ठः श्रीवीरवैष्णवः। रामानन्दी हरिव्यासी निम्बार्कश्च महेश्वरि!। ततो भागवतो देवि! दश भेदाः प्रकी-